रघुवंश-महाकाव्यस्य निर्माणमकरोत् ।" किन्तु समुचित प्रमाणाभावात् किंवदन्त्येषा युक्तियुक्तं न प्रतीयते ।

**कालिदासस्य समयः**–महाकवेः कालिदासस्य समय-विषयेऽपि बहूनि मतमातान्तराणि दृश्यन्ते । तेषु मतत्रयं विशेषतः प्रचलितमस्ति ।

1. षष्ठशताब्दी
2. चतुर्थशताब्दी
3. ई. पू. प्रथमशताब्दी ।

अत्र तृतीयं मतमेव न्यायसङ्गतं युक्तियुक्तञ्च प्रतीयते ।

**कालिदासस्य रचना**–महाकविना कालिदासेन अधोलिखिताः ग्रन्थाः विरचिताः–

1. रघुवंशमहाकाव्यम्
2. कुमारसम्भवमहाकाव्यम्
3. ऋतुसंहारम्
4. मेघदूतम्
5. विक्रमोर्वशीयम्
6. मालविकाग्निमित्रम्
7. अभिज्ञानशाकुन्तलम्

**प्रश्नः 9. अभिज्ञानशाकुन्तलमादाय "उपमा कालिदासस्य" इत्युक्तिः विवेचनीया ?**

**उत्तरम्**–महाकविकालिदासेन उत्प्रेक्षा–रूपक–समासोक्ति–विभावना – विशेषोक्ति – काव्यलिङ्ग – अतिशयोक्ति–अप्रस्तुत-प्रशंसा–अर्थान्तरन्यासाद्यलङ्काराणां प्रयोगः प्रशस्तरूपेण कृतोऽस्ति, तथापि अस्य उपमायां यथा वैलक्षण्यं सूक्ष्मतत्त्वसन्निवेशश्च दृश्यते न तथा अन्येषु अलङ्कारेषु इति । अतएव आलोचकैः कालिदासस्य उपमा एव प्रशंसिताऽस्ति– **"उपमा कालिदासस्य इति ।" "कालिदासस्य सर्वस्वमभिज्ञान-शाकुन्तलम्"** इत्युक्त्यनुसारेण अभिज्ञानशाकुन्तलतः उपमायाः कतिचन उदाहरणानि द्रष्टव्यानि सन्ति–

1. मृगानुसारिणः राज्ञः पिनाकिनः उपमा अतीव मनोहरा अस्ति ।

   **"मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्"** ।

2. पतिगृहं गन्तुमुद्यतां शकुन्तलाम् आशीर्वचसा सभाजयन् महर्षिकण्वः कथयति यत्–

   **"ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव"** ।

3. **"प्रजाः प्रजाः स्वा इव तन्त्रयित्वा...........शीतं गुहस्थानमिव द्विपेन्द्रः"**

   इत्यत्र राज्ञः दुष्यन्तस्य द्विपेन्द्रेण सह उपमा, सजीवस्य सजीवेनोपमायाः प्रकृष्टतरं निदर्शनमस्ति ।

4. शकुन्तलाशरीरस्य विटपादिनोपमा यथा–

   **"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू"**

5. शकुन्तलारूपवर्णने मालोपमा; यथा–

   **"अनाघ्रातं पुष्पं ......समुपस्थास्यति विधिः"**

6. क्षौमस्य इन्दुना सह उपमा, यथा–

   **"क्षौमं केनचिदिन्दुपाण्डुतरुणा मांगल्यमाविष्कृतम्**

एवमेव अन्या अपि उपमा द्रष्टव्याः सन्ति । अनेन चोपमा-प्रयोगे अभिज्ञानशाकुन्तलं किमपि विशिष्टमेव स्थानं विभर्ति ।

**प्रश्नः 10. अभिज्ञानशाकुन्तले अङ्गिरसपरिपाको विवेचनीयः ?**

**उत्तरम्**–"एक एव भवेदङ्गी शृङ्गारो वीर एव वा, अङ्गमन्ये रसाः सर्वे......" इत्यनेन अभिज्ञानशाकुन्तले सम्भोगशृङ्गारः अंगी अस्ति । विप्रलम्भश्रृङ्गारः, वीरः, अद्‌भुतः, करुणः, हास्यः, भयानकः, वात्सल्यश्चेति रसा अङ्गरूपेण महाकवि कालिदासेन उपनिबद्धाः सन्ति।

नाटकस्यान्ते यस्य रसस्य सहृदयमनसि प्रभावो जायते तथा च काव्ये यस्य प्राबल्यं भवति, स एव रसोऽङ्गी भवति इति सामान्यो नियमः । अभिज्ञानशाकुन्तलस्य उत्तरार्द्धे दुष्यन्तशकुन्तलयोः सम्मेलनं भवति तथा च प्रथमद्वितीय तृतीयसप्तमाङ्केषु सम्भोगरस्यैव प्राबल्यमस्ति अतः सम्भोगशृङ्गार एव अङ्गीरसः; विप्रलम्भस्तु अङ्गरूपेण स्थितः ।

सम्भोगशृङ्गारस्तु श्रवणदर्शनचुम्बनालिङ्गनाद्यनेकविधो भवति । यथा शाकुन्तले–

1. **'नहिकेवलमाकृतिरेव वागप्यस्याः मधुरा'**
2. **'अहो मधुरमासां दर्शनम्'**
3. **'इदं किलाव्याजमनोहरं वपुः'**
4. **'सरसिजमनुविद्धं शैलवेनापि रम्यम्'**
5. **'समस्तापः कामं मनसिजनिदाघ प्रसरयो :'**
6. **'तव न जाने हृदयं मम'**
7. **'एकैकमत्र दिवसे दिवसे मदीयम्'**

इत्थं सम्भोगश्रृङ्गारस्य साम्राज्यमस्ति अभिज्ञानशाकुन्तले ।

**प्रश्नः 11. "काव्येषु नाटकं रम्यम्" इत्युक्तिः समीक्षणीया ?**

**उत्तरम्**–काव्यं सर्वथा ग्राह्यं परमावश्यकं च भवति । अतएव **'रामादिवद् वर्तितत्यं न रावणादिवत्'** इत्युच्यते । काव्यं क्वचित् कुमार्गप्रस्थितान् नियमयति, क्वचित् विवादं प्रशमयति, सदुपदेशैः क्वचित् रक्षणाय कल्पते, अविनीतान् विनीतान् करोति, उत्साहयति निरुत्साहान्, दृढ़यति भीरुकान्,

Scanned with OKEN Scanner

अखर्वगर्वानपि खर्वान् करोति । किं बहुना यद्यत् असत्यम् अशिवम्, असुन्दरञ्च भवति तत्तत् सर्वं सत्यं शिवं सुन्दरञ्च क्रियते ।

तदिदं काव्यं दृश्यं श्रव्यञ्च भेदेन द्विधा विभक्तमस्ति काव्यशास्त्रिभिः । अनयोः दृश्यश्रव्यभेदयोः दृश्यं काव्यमधिकं रमणीयतरमिति आलोचकाः वदन्ति । अत्र नाटकपदेन दृश्यं काव्यमभीष्टमस्ति । यद्यपि नाटकं दृश्यकाव्यस्य अन्यतमभेदोऽस्ति, दृश्यस्य रूपकोपरूपकत्वेन रूपकस्य च नाटकप्रकरणादिदशभेदेषु उपरूपकस्य तु नाटिकादि अष्टादशभेदेषु विभक्तत्वात् । तथापि एषु सकलेषु अपि भेदेषु नाटकं प्रधानम् । अस्येदं कारणं श्रव्यकाव्ये ऐतिहासिकाः घटनाः केवलं श्रूयन्ते, दृश्ये (नाटके) धृतरामादिरूपैः नटैः मञ्चे उपस्थापितासु सकलासु घटनासु सहृदयमनांसि पूर्णरूपेण सङ्घटन्ते तथा चैवं सुस्पष्टतां गतासु घटनासु सहृदयमनसि रसपरिपाकोऽपि समुचितरूपेण समधिकं च जायते अत एव उचितमेवोक्तम्–

"काव्येषु नाटकं रम्यम् ।"

**प्रश्नः 12. अभिज्ञानशाकुन्तलम् इति नामकरणस्य समीक्षा क्रियताम् ?**

उत्तरम्–काव्ये किमपि प्रसिद्धम् ऐतिहासिकं, काल्पनिकं वा कथानकं भवति । अभिज्ञानशाकुन्तलम् अस्ति एकं समस्याप्रधानं घटनाप्रधानं वा नाटकम् । अत्र अभिज्ञानम् इति नामकरणं कृतं महाकविकालिदासेन । नाटकेऽस्मिन् नायिका शकुन्तला नायकेन राज्ञा दुष्यन्तेन गान्धर्वविवाहविधिना परिणीता । स्वनगरं प्रति परावर्तमानेन तेन **"एकैकमत्र दिवसे दिवसे मदीयं, नामाक्षरं गणय, गच्छसि यावदन्तम् ।"** इत्युक्त्वा स्वनामाङ्कितमंगुलीयकं स्वयमेव शकुन्तलायाः हस्ते परिधापितम् ।' इत्यभिज्ञानविषयिणी घटना महाभारतस्यादिपर्वात् गृहीतम् ।

"अभिज्ञायते अनेन इति अभिज्ञानम् चिह्नमिति, अभि + ज्ञा + ल्युट् । शकुन्तैः लालिता शकुन्तला । शकुन्तलामधिकृत्य कृतं नाटकं शाकुन्तलम् 'अधिकृत्यकृते ग्रन्थे' इति सूत्रेण 'अण्' प्रत्ययः । अभिज्ञानप्रधानं शाकुन्तलम् 'अभिज्ञानशाकुन्तलम्' इति व्युत्पत्तिं दर्शं दर्शं सिद्धमेव अभिज्ञानशाकुन्तलस्य समस्याप्रधानत्वम्, नायिकाप्रधानत्वं च ।

अतः समस्यां नायिकां च, आदाय कृतमस्य "अभिज्ञानशाकुन्तलम्" इति नामकरणं सर्वथा सफलमुचितम् चास्ति।

अथवा–अभिज्ञानसहितं शाकुन्तलम् अभिज्ञानशाकुन्तलम् ।

अथवा–अभिज्ञानञ्च शकुन्तलाञ्च इति अभिज्ञानशाकुन्तलम् ।

**प्रश्नः 13. अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य वैशिष्ट्यं प्रतिपाद्यताम् ?**

उत्तरम्–कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् । अभिज्ञानशाकुन्तले चतुर्थेऽङ्के कविः कण्वरूपेण उपस्थितोऽस्ति अतएव चतुर्थम् अङ्कं शाकुन्तलस्य हृदयं मत्त्वा आलोचकैः स्वीकृतमस्ति–

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।**
**तत्रापि चतुर्थोऽङ्कः** ······ ·············॥

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकताऽलौकिकतयोः प्रकृतिमानवयोः विलक्षणं समन्वयोऽस्ति । **"वनौकसोऽपि वयं लौकिकज्ञा एव"** इति कण्वस्य उद्घोषणा चतुर्थाऽङ्कस्थ वैशिष्ट्यं द्विगुणयति । अरण्यवासिन्या शकुन्तलायाः पतिगृहं हस्तिनापुरगमनेन च अरण्यराजप्रसादयोः किमपि विलक्षणं सम्बन्धं प्रतिपादयति चतुर्थोऽङ्क : ।

दुर्वाससः शापः, आकाशवाणी, शकुन्तलायाः पतिगृहगमनम्, वनस्पतिभ्यः शकुन्तलायै आभूषणप्रदानम्, कोकिलरवेण शकुन्तलायाः पतिगृहगमनाय वनस्पतीनां स्वीकृतिः, मृगशावकेन शकुन्तलामार्गावरोधः, शकुन्तलायाः प्रस्थानं चेति चतुर्थोऽङ्कस्य महत्वपूर्णाः घटनाः सन्ति ।

अभिज्ञानशाकुन्तलस्य चमत्कारो दुर्वाससः शापघटनायामाश्रितोऽस्ति अत एव अंकोऽयं विशिष्टं स्थानं विभर्ति ।

**"सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्"** इत्यनेन शकुन्तलायाः पतिगृहगमनाय अनुज्ञाप्रार्थिता ।

**"क्षौमं केनचिदिन्दुपाण्डुतरुणा मांगल्यमाविष्कृतम्"** इत्यनेन शकुन्तलायै वनस्पतिभि आभूषणप्रदानमपि विशिष्टा घटना अस्ति । **अस्मान् साधु विचिन्त्य** ······" इति महर्षिणा कण्वेन दुष्यन्ताय तथा **"शुश्रूषस्व गुरून् कुरु–"** इत्यनेन शकुन्तलायै कृत उपदेशः शाश्वतिकः तथा समाजे सर्वेषां कृते महते उपयोगाय अस्ति ।

इत्थं अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्को निश्चितमेव विशिष्टतरोऽस्ति ।

**प्रश्नः 14. आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥**

**पद्यमिदम् व्याख्येयम्–**

**उत्तरम्**–पद्यमिदं महाकविना कालिदासेन विरचितस्य 'अभिज्ञानशाकुन्तलनाटकस्य प्रथमांकस्य प्रस्तावनातः समुद्धृतमस्ति ।

अत्र सूत्रधारेण पात्राणां सावधानतोपदेशार्थम् उक्ते सति 'सुविदितप्रयोगतयार्थस्य न किमपि परिहास्यते' इति नटीवचनं श्रुत्वा सूत्रधारमुखेन महाकविः भूतार्थं कथयति–

प्राज्ञानां सन्तोषपर्यन्तम् अभिनयकौशलं समीचीनं न स्वीकरोमि । कृताभ्यासानां निपुणानामपि सुदृढं चित्तं स्वविषये अविश्वस्तं भवति ।

Scanned with OKEN Scanner